[1]तञ्चन्-ती, तञ्चयन्-न्ती, तितञ्चिषन्-तितङ्क्षन्-न्ती ; —
तञ्चिष्यन्-तङ्क्ष्यन्-न्ती-ती, तञ्चयिष्यन्-न्ती-ती, तितञ्चिषिष्यन्, तितङ्क्षिष्यन्-न्ती-ती ; —

— तञ्चयमानः, तञ्चयिष्यमाणः, — तातच्यमानः, तातचिष्यमाणः ;
[2]संतक्-संतग्-सन्तचौ-सन्तचः ; — —
[3]तक्तम्-[A]क्तः-क्तवान्, तञ्चितः, तितञ्चिषितः-तितङ्क्षितः, तातचितः-तवान् ;
तञ्चः, तञ्चः, तितञ्चिषुः-तितङ्क्षुः, [4]तातञ्चः ;
तञ्चितव्यम्-तङ्क्तव्यम्, तञ्चयितव्यम्, तितञ्चिषितव्यम्-तितङ्क्षितव्यम्, तातचितव्यम् ;
तञ्चनीयम्, तञ्चनीयम्, तितञ्चिषणीयम्-तितङ्क्षणीयम्, तातचनीयम् ;
[5]तङ्क्यम्, तञ्च्यम्, तितञ्चिष्यम्-तितङ्क्ष्यम्, तातच्यम् ;
ईषत्तञ्चः-दुस्तञ्चः-सुतञ्चः ; — — —
तच्यमानः, तञ्च्यमानः, तितञ्चिष्यमाणः-तितङ्क्ष्यमाणः, तातच्यमानः ;
आतङ्कः, तञ्चः, तितञ्चिषः-तितङ्क्षः, तातचः ;
तञ्चितुम्-तङ्क्तुम्, तञ्चयितुम्, तितञ्चिषितुम्-तितङ्क्षितुम्, तातचितुम् ;
तञ्चा, तञ्चना, तितञ्चिषा-तितङ्क्षा, तातचा ;
तञ्चनम्, तञ्चनम्, तितञ्चिषणम्-तितङ्क्षणम्, तातचनम् ;
[6]तञ्चित्वा-तक्त्वा, तञ्चयित्वा, तितञ्चिषित्वा-तितङ्क्षित्वा, तातचित्वा ;
प्रतच्य, प्रतञ्च्य, प्रतितञ्चिष्य-प्रतितङ्क्ष्य, प्रतातच्य ;

---

1. 'रुधादिभ्यः श्नम्' (3-1-78) इति श्नम् विकरणप्रत्ययः। मित्त्वादयम् अन्त्यादचः परो भवति। 'श्नान्नलोपः' (6-4-23) इति धातुनकारस्य लोपः। 'श्नसोरल्लोपः' (6-4-111) इति अकारलोपः। अनुस्वारपरसवर्णौ भवतः।
2. सम्यक् तञ्चतीति सन्तक्। 'अनिदिताम्—' (6-4-24) इत्युपधानकारस्य लोपः।
3. ऊदित्त्वेनेड्विकल्पात्, निष्ठायाम्, 'यस्य विभाषा' (7-2-15) इतीण्णिषेधः। उपधानकारलोपः। कुत्वम्।
4. 'यङोऽचि च' (2-4-74) इत्यनेन यङो लुक्। नचात्रोपधानकारस्य लोपः शङ्क्यः; लुका लुप्तत्वेन 'न लुमताऽङ्गस्य' (1-1-63) इति प्रत्ययलक्षणाभावात्।
5. 'चजोः कु घिण्ण्यतोः' (7-3-52) इति कुत्वम्। एवं घञ्यपि कुत्वं ज्ञेयम्।
6. इट्पक्षे, 'न क्त्वा सेट्।' (1-2-18) इति कित्त्वनिषेधान्नलोपो न।

A. 'संतक्तनद्धवसनाः परिवेगवृत्ता
रङ्गं समेत्य पप्रचुः स्वजनांश्च मल्लाः॥' धा. का. 3.3.